ब्दादश्लेषेऽपि चतुर्विंशतिप्रकारः। उपमानानुन्यूनतायामनयैव भङ्ग्या चतुर्विंशतिप्रकारतेति मिलित्वाऽष्टचत्वारिंशत्प्रकारो व्यतिरेकः। उदाहरणम्। "अकलङ्कं मुखं तस्या न कलङ्की विधुर्यथा"। अत्रोपमेयगतमकलङ्कत्वमुपमानगतञ्च कलङ्कित्वं द्वयमप्युक्तम्। यथाशब्दप्रतिपादनाच्च शाब्दमौपम्यम्। अत्रैव "न कलङ्कि विधूपममिति" पाठे आर्थम् "जयतीन्दुं कलङ्किनमिति" पाठे तु इवादितुल्यादिपदविरहादाक्षिप्तम्। अत्रैवाकलङ्कपदत्यागे चोपमानगतनिकर्षकारणानुक्तिः" द्वयोरनुक्तौ द्वयोरनुक्तिः। श्लेषे यथा। "अतिगाढगुणायाश्च नाब्जवद्भङ्गुरा गुणाः"। अत्र इवार्थे वतिरिति शाब्दमौपम्यम् उत्कर्षनिकर्षकारणयोर्द्वयोरप्युक्तिः। गुणशब्दः श्लिष्टः। अन्ये भेदाः पूर्व्ववदूह्याः। एतानि चोपमेयस्योपमानादाधिक्ये उदाहरणानि। न्यूनत्वे दिङ्मात्रम्। यथा। "क्षीणःक्षीणोऽपि शशी भूयोभूयोऽभिवर्द्धते नित्यम्। विरम प्रसीद सुन्दरि! यौवनमनिवर्त्ति यातं तु"॥ "अत्रोपमेयभूतयौवनास्थैर्य्यस्याधिक्यं तेनात्र "उपमानादुपमेयस्याधिक्ये विपर्य्यये वा व्यतिरेक इति" केषाञ्चिल्लक्षणे "विपर्य्यये वेति पदमनर्थकमिति" यत् केचिदाहुः तन्न विचारसहम्। तथा ह्यत्राधिकन्यूनत्वे सत्त्वासत्त्वे एव विवक्षिते। अत्र च चन्द्रापेक्षया यौवनस्यासत्त्वं स्फुटमेव। अस्तु वात्रोदाहरणे कथञ्चिद्गतिः। "हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूतपथः सितीकृतः"॥ इत्यादिषु का गतिरिति सुष्ठूक्तं "न्यूनताथ वेति"।

१०८ व्याघातः "व्याघातः स तु केनापि वस्तु येन यथा कृतम् तेनैव चेदुपायेन कुरुतेन्यस्तदन्यथा१। सौकर्य्येण च कार्य्यस्य विरुद्धं क्रियते यदि२। सा०द० "दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः"। "इहैव त्वं तिष्ठ द्रुतमहमहोभिः कतिपयैः समागन्ता कान्ते! मृदुरसि नचायाससहना। मृदुत्वं मे हेतुः सुभग! भवता गन्तुमधिकं न मृद्वी सोढा यद्विरहकृतमायासमसमम्"॥ अत्र विदेशं जिगमिषुणा नायकेन नायिकायाः मृदुत्वं सहगमनाभावहेत्वेनोक्तं नायिकया तु प्रत्युत सहगमने ततोऽपि सौकर्य्येण तदेव हेतुतयोक्तम्।

१०९ व्याजनिन्दा 'निन्दायानिन्दया व्यक्तिर्व्याजनिन्देति गीयते" च०। "विधे! स निन्द्योयस्ते प्रागेकमेवाहरच्छिरः"। अत्र एकशिरोहर्त्तुः शिवनिन्दाव्याजेन विधेर्निन्दाया व्यक्तिः।

११० व्याजस्तुतिः "उक्ता व्याजस्तुतिः पुनः। निन्दास्तुतिभ्यां वाच्याभ्यां गम्यत्वे स्तुतिनिन्दयोः"। सा०द०। निन्दाया स्तुतेर्गम्यत्वे व्याजेन स्तुतिरिति व्युत्पत्त्या व्याजस्तुतिः स्तुत्या निन्दाया गम्यत्वे व्याजरूपा स्तुतिः। क्रमेण यथा। "स्तनयुगमुक्ताभरणाः कण्टककलिताङ्गयष्टयो देव!। त्वयि कुपितेऽपि प्रागिव विश्वस्ता रिपुस्त्रियो जाताः"॥ "व्याजस्तुतिस्तव पयोद! मयोदितेयं यज्जीवनाय जगतस्तव जीवनानि। स्तोत्रन्तु ते महदिदं घन! धर्म्मराजसाहाय्यमर्ज्जयसि यत् पथिकान्निहत्य"॥

१११ व्याजोक्तिः "व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनम्" च०। "सखि! पश्य गृहारामपरागैरस्मि धूसरा"।

११२ शुद्धापह्नुतिः "शुद्धापह्नुतिरन्यस्यारोपार्थो धर्म्मनिह्नवः"। च० "नायं सुधांशुः किं तर्हि? व्योमगङ्गासरोरुहम्"।

११३ श्लेषः शाब्दोऽलङ्कारः आर्थस्य शाब्दस्योक्तः २८९ पृष्ठे आर्थो यथा "शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्" सा०द०। स्वभावादेकार्थैरिति शब्दश्लेषाद्व्यवच्छेदः। "सर्व्वदो माधवःपायात् स यो गङ्गामदीधरत्"।

११४ संसृष्टिः "यद्येत एवालङ्काराः परस्परविमिश्रिताः। तदा पृथगलङ्कारौ संसृष्टिः सङ्करस्तथा" सा०द० "देवः पायादपायान्नः स्मेरेन्दीवरलोचनः। संसारध्वान्तविध्वंसहंसः कंसनिसूदनः। अत्र पायात्पायादिति यमकम् स्मेरेन्दीवरेत्यादौ चानुप्रास इति शब्दालङ्कारयोः, संसारध्वान्तेत्यत्र उपमा, हंस इत्यत्र रूपकमित्यर्थालङ्कारयोः, शब्दार्थालङ्कारयोश्च परस्परानपेक्षयैवात्र संसर्गः।

११५ सङ्करः "अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितः। सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः" सा०द०। तत्राङ्गाङ्गिभावे यथा। "आकृष्टवेगविगलद्भुजगेन्द्रभोगनिर्म्मोकपट्टपरिवेष्टनयाम्बुराशेः। मन्थव्यथाव्युपशमार्थमिवाशु यस्य मन्दाकिनी चिरमवेष्टत पादमूले"॥ अत्र निर्म्मोकपट्टापह्नवेन मन्दाकिन्या आरोप इत्यपह्नुतिः। सा च मन्दाकिन्या वस्तुवृत्तेन यत्पादमूलवेष्टनं तच्चरणमूलवेष्टनमिति श्लेषमुत्थापयतीति तस्याङ्गम् श्लेषस्य पादमूलवेष्टनमेव चरणमूलवेष्टनमित्यतिशयोक्तेरङ्गम् अतिशयोक्तिश्च "मन्थव्यथाव्युपशमार्थमिव" इत्युत्प्रेक्षाया अङ्गम्। उत्प्रेक्षा चाम्बुराशिमन्दाकिन्योर्नायकनायिकाव्यवहारं गमयतीति समासोक्तेरङ्गम्। यथा वा। "अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः। अहो दैवगतिश्चित्रा तथापि न समागमः"॥ अत्र समासोक्तिर्विशेषोक्तेरङ्गम्। सन्देहसङ्करो यथा। "इदमाभाति गगने भिन्दानं सन्ततं तमः। अमन्दनयनानन्दकरं मण्डलमैन्दवम्"॥ अत्र किं मुखस्य